# Vishvarupa Sarasvatikritam Krishnanarayana Stotram

# विश्वरूपा सरस्वतीकृतं कृष्णनारायणस्तोत्रम्

## Document Information

Text title : Vishvarupa Sarasvatikritam Krishnanarayana Stotram

File name : vishvarUpAsarasvatIkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, sarasvatI, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 45/31-40||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# विश्वरूपा सरस्वतीकृतं कृष्णनारायणस्तोत्रम्

तावत्तत्र समायाता दिव्या गौः श्वेतलोहिता ।
चतुःशृङ्गी चतुर्वक्त्रा चतुष्पादा चतुर्मुखी ॥ ३१॥

चतुर्हस्ता चतुर्नेत्रा चतुर्दंष्ट्रा चतुःस्तनी ।
ननाम पादयोस्तूर्णं व्योम्ना चागत्य वै पुरः ॥ ३२॥

कृष्णनारायणपादतले लिलेह जिह्वया ।
हरिर्वारि ददौ तस्यै जिह्वायां सा पपौ द्रुतम् ॥ ३३॥

कुमारी साऽभवत्तत्र विश्वरूपा सरस्वती ।
तुष्टाव परमात्मानं श्रीपतिवल्लभं निजम् ॥ ३४॥

नमोऽनादिकृष्णकान्त रमाकान्त च ते नमः ।
नमः श्रीमाणिकीकान्त लक्ष्मीकान्त च ते नमः ॥ ३५॥

नमः सरस्वतीकान्त राधाकान्त च ते नमः ।
सुखदाश्रीकान्त पद्मावतीकान्त च ते नमः ॥ ३६॥

अहं शक्तिर्भवान् शक्तः कृष्णाऽहं कृष्ण ते नमः ।
अहं भगवती भार्या भगवाँस्त्वं पतिः प्रभुः ॥ ३७॥

तपस्तप्तं समायाता गोलोकात्तु तवाऽऽज्ञया ।
पावनीं मां समाज्ञाप्य स्थापयाऽत्र सरस्तटे ॥ ३८॥

तीर्थं त्वत्र हरे कृष्ण मन्नाम्नाऽपि विधेहि च ।
तथाऽस्त्विति हरिः प्राह बद्रिके तां सरस्वतीम् ॥ ३९॥

अस्थापयत् सरस्तीरे महाधेनुं सरस्वतीम् ।
नारायणसरस्तीरे तीर्थं सारस्वतं शुभम् ॥ ४०॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य
विश्वरूपा सरस्वतीकृतं कृष्णनारायणस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय ४५/३१-४० ॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 45/31-40..

Proofread by PSA Easwaran

*Vishvarupa Sarasvatikritam Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*